सन्तापक्रोधनैश्चापि जायते कफसंक्षयः ।
तेनदाहोऽथवा पाण्डुः शोषो निःश्वसनं भ्रमः ॥
विनिद्रता क्षुत् तृष्णा च स्त्रीसङ्गे नाभिनन्दति ।
तस्य शीतान्नपानानि कन्दशाकादिकैरसैः ॥
आनूपैर्दधिदुग्धैर्वा सेवनं न समीहितम् ।
त्रिभिर्दोषैः क्षयं प्राप्तैस्तदा हि मरणं ध्रुवम् ॥
तस्य क्रिया प्रयोक्तव्या साधारण्या महामते ! ॥
अथ धातुः क्षयं वक्ष्ये हारीत ! शृणु साम्प्रतम् ।
रसरक्तमांसमेदः प्रत्येकं क्षयलक्षणम् ॥
रसक्षयेऽतिशोषश्च मन्दाग्निलश्च वेपथुः ।
शिरोरुक् मन्दचेष्टत्वं जायते च क्लमो भ्रमः ॥
रक्तक्षये क्षयः पाण्डुर्मन्दचेष्टो भवेन्नरः ।
श्वासनिष्ठीवनं शोषो मन्दाग्निलश्च जायते ॥
मांसक्षयेऽतिकृशता चेष्टनाशाङ्गभङ्गता ।
निद्रानाशोऽविनिद्रास्य विसंज्ञो लघुविक्रमः ॥
मेदः क्षये मन्दबलो विसंज्ञता
शाङ्गस्य भङ्गो वमनं परुषता ।
श्वासाभिकासोऽरुचिताग्निमन्दता
विशेषकम्पो वपुषश्च शुष्कता ॥
अस्थिक्षये स्यात् अतिमन्दचेष्टता
मन्दश्च वीर्य्यं खलु मेदसः क्षये ।
विसंज्ञता स्यात् कृशता च कम्पनं
अङ्गस्य भङ्गो वमनं परुषता ॥
शोषश्च देहे सदनश्च शोषिता
विकम्पनं शोषबला च जायते ।
भिषग्वरस्तत् परिवेदलक्षणं
मज्जक्षये कम्पनमेव जायते ॥
भ्रमः क्लमः स्यादतिमन्दचेष्टः
शोषो निशाजागरणश्च तन्द्रा ॥
मन्दज्वरः शोषसमो मनुष्ये
शुक्रक्षये चास्य विचेष्टितानि ।
रूक्षं भ्रमः कम्पनशोषरोधः
स्त्रीद्वेषितादीनि विरूपता च ॥
इदानीं संप्रवक्ष्यामि भेषजानि यथाक्रमम् ।
सेचनं रूक्षणञ्चैव तथा विस्रावणं हितम् ।
जाङ्गलानि च मांसानि भोजनानि च सेवयेत् ॥
गुडूची शृङ्गवेरञ्च यवानी क्वथितं जलम् ।
मरिचैः क्वथितं दुग्धं पाने रात्रौ प्रशस्यते ॥
रसानां तेन वृद्धिः स्यात् शीघ्रं तस्मादिहुच्यते ॥
रसानां वृद्धिकरणं गोधूमयवशालिभिः ।
क्वथितानि भिषक् मेषैर्जाङ्गलानि विशेषतः ॥
घृतदुग्धसिताक्षौद्रमरिचानि च पिप्पली ।
पानं शस्तं मनुष्याणां रक्तवृद्धिकरं मतम्" ॥
इति रसरक्तवृद्धिकरम् ॥ * ॥
"आनूपानि च धान्यानि लघुनामानि भक्षयेत् ।
भक्ष्यांश्च घृतदुग्धादीन् सेवयेन्मधुराणि च ॥
रसाश्च जाङ्गलानि स्युः सेवनार्थे भिषग्वर ! ।
सितोपलादिकं चूर्णं अजाक्षीरं सकोलकम् ।
हितं पानं क्षये चैव कफमप्रासराग्नये"।
इति मांसमेदोवृद्धिकरम् ॥ * ॥
"घृतानि च सपक्वानि क्षीराणि विविधानि च ।
चन्दनानि च शाल्यादि-चूर्णानि च भिषग्वर ! ॥
जाङ्गलानि च सर्व्वाणि सेवनीयानि पुत्रक ! ।
अन्नानि मधुराणीह सर्व्वाणि च प्रयोजयेत्" ॥
इत्यस्थिवृद्धिकरणम् ॥ * ॥
"शुक्रक्षये प्रयाकानि रसानि च विशेषतः ।
नवनीतं तथा क्षीरं मधुराणि च सेवयेत् ॥
कर्कटी मूलपयसा विदारी कन्दशाल्मली ।
सिताढ्यञ्च हितं पानं शस्यन्ते मधुराणि च" ॥
इति शुक्रक्षयवृद्धिकरणम् ॥ * ॥
"बला विदारी लघुपञ्चमूली
क्षीरद्रुमत्वक् च ततः पयोव्या ।
पुनर्नवा मेषतुरङ्गजन्यः
सञ्जीवनीयैर्मधुकैः समांशैः ॥
अक्षप्रमाणानि समानि तानि
सर्व्वाणि चैतान्यपि चूर्णयित्वा ।
विमिश्रयेत् तत्र कणाशतानि
यवान्नगोधूमयवांश्च पिष्टा ॥
तुगासमांशा सिततण्डुलानां
पेयं तु शृङ्गाटकमिश्रितञ्च ।
प्रकीर्णकार्द्धेन वियोजनीयं
सर्व्वांशकेनापि सिता पयोव्या ॥
विभावयेच्चामलकीरसेन
वारत्रयं गोपयसा विभाव्य ।
ततोऽस्य सर्व्वैः सह शर्कराभि
र्घृतेन चैवं पुनरेव भाव्यम् ।
तं भक्षयेत् क्षौद्रयुतं पलार्द्धं
जीर्णे च भोज्यं कटुकाम्लवर्ज्ज्यम् ॥
क्षीरं घृतं वा सितशर्करां वा
यवान्नगोधूमकशालिभक्ष्यान् ।
जाताग्निपाकं जठरे नरस्य
देयो विधिज्ञैः क्षयरोगशान्त्यै ।
मद्यक्षये श्वासचिराभिताप-
संपीड़ितानाञ्च तथाशिरोऽर्त्तौ ।
"पित्तातुराणां रुधिरक्षयाणां
श्रमाध्वसंपीड़ितकामलानाम् ।
श्वासातुराणां मधुमेहिनाञ्च
क्षीणेन्द्रियाणां बलकारिशस्तम्" ॥
इति बालादिचूर्णम् ॥ * ॥
"पिप्पली वर्द्धमानन्तु ज्वरे जीर्णे प्रशस्यते ।
मन्दाग्नौ पीतमेवाय गुदजे वा तथा पुनः" ॥
इति पिप्पलीवर्द्धमानम् ॥ * ॥
"द्वे पले मार्कवं धातु साधकञ्च पुनर्नवा ।
तुगा एला शालिपर्णी वासकञ्च दुरालभा ।
चूर्णार्द्धेन समं योज्यं त्रिगन्धं मरिचानि च ।
तालीशं मगधा चैव तदर्द्धेन शिलोद्भवम् ।
शिलाभेदस्तदर्द्धेन सर्व्वमेकत्र मिश्रयेत् ।
समेन तिलचूर्णन्तु शर्कराभिः समायुतम् ।
तेन क्षयो राजयक्ष्मा कामला च विनश्यति ।
अपस्मारं जयत्याशु बलवीर्य्याधिको भवेत् ।
शाम्यन्ति च महारोगाः शुक्राढ्यो जायते नरः" ॥
इति शिलाजतुचूर्णम् ॥ * ॥
"बलाश्वगन्धा वृहतीद्वयञ्च
पर्णीद्वयं गोक्षुरकं शिरा च ।
पटोलनिम्बस्य दलानि मुस्तम्
सचायमाणा सदुरालभा च ॥
कृत्वा कषायञ्च पदावशेषं
पूते ततश्चूर्णमिदं प्रयुञ्ज्यात् ।
द्राक्षा शठी पुष्करमूलधात्री
दुग्धं समं तामलकीकषायम् ॥
सर्पिः प्रयुक्तं नवनीतकञ्च
सर्पिस्तदर्द्धेन वियोजनीयम् ।
सिद्धं घृतं पानमथैव वस्तौ
नस्ये तथाभ्यञ्जनभोजने च ॥
स पाण्डुकासक्षयकामलानाम्
राजक्षये क्षीणबलेन्द्रियाणाम् ।
क्षतेषु शोषेषु क्षयेषु शस्तं
शिरोऽर्त्तिपार्श्वार्त्तिगुदामयघ्नम्" ॥
इति बलाद्यं घृतम् ॥ * ॥
"चन्दनं सरलं दारु पद्मैला बालकं शठी ।
नखश्चैलेयकं एला पद्मकं नागकेशरम् ॥
कक्कोलकं मुरामांसी शैलेयं द्वे हरीतकी ।
रेणुकालक् कुङ्कुमञ्च शारिवे द्वे निशागुरु ॥
बला रास्ना च नलिका कषायं सुपरिश्रुतम् ।
तैलमस्तु तथा लाक्षा रसेन समभागिकम् ॥
मन्दाग्निना पचेत्तैलं सिद्धं पाने च वस्तिषु ।
नस्ये चाभ्यञ्जने चैव योजयेत्तद्भिषग्वरः ॥
हन्ति पाण्डुक्षयं कासं ग्रहघ्नं बलवर्णकृत् ।
मन्दज्वरतपस्मारकुष्ठपाम हरेत् पुनः ।
करोति बलपुष्ट्योजःप्रज्ञायुर्बलवर्द्धनम् ॥
रूपसौभाग्यदं पुण्यं सर्व्वभूतवशङ्करम्" ॥
इति चन्दनाद्यं तैलम् ॥
इति क्षयरोगचिकित्सा ॥ इति हारीते चिकित्सितस्थाने दशमेऽध्याये ॥ * ॥
"त्रिकटु त्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितं तुल्यं लौहं पारदसिन्दुरम् ।
मधुना क्षयरोगाणां हन्त्ययं क्षयकेशरी" ॥
इति क्षयकेशरी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे ॥ * ॥)
अस्य अन्यत् निदानादि यक्ष्मशब्दे द्रष्टव्यम् ।
तस्यौषधान्तरं यथा,—
"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् ।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्" ॥
इति गारुड़े १९३ अध्यायः ॥ (क्षयत्यस्मादनेन वा क्षि + क्षये + अच् । क्षयति विनाशयति इति । अन्तर्भूतणिच् ततोऽच् ।) रोगमात्रम् । इति राजनिर्घण्टः ॥

क्षयतरुः, पुं, (क्षयस्य क्षयार्थं (वा तरुः ।) स्थाली वृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थाली वृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

क्षयथुः, पुं, (क्षि + अथुच् ।) कासः । इति हेमचन्द्रः ॥

क्षयनाशिनी, स्त्री, (क्षयं क्षयाख्यरोगं नाशयतीति । क्षय + नश् + णिच् + णिनि + ङीप् ।) जीवन्ती-वृक्षः । इति शब्दमाला ॥